महिष्या सह राजेन्द्र ! सत्कारेण सुवर्च्चसम् ॥
तस्मै प्रसन्नो दमनः सभार्य्याय वरं ददौ ।
कन्यारत्नं कुमारांश्च त्रीनुदारान् महायशाः ॥
दमयन्तीं दमं दान्तं दमनञ्च सुवर्च्चसम् ।
उपपन्नान् गुणैः सर्व्वैर्भीमान् भीमपराक्रमान् ॥
दमयन्ती तु रूपेण तेजसा यशसा श्रिया ।
सौभाग्येन च लोकेषु यशः प्राप सुमध्यमा ॥”
अस्या विशेषविवरणन्तु तमेवाध्यायमारभ्य विस्तरशो द्रष्टव्यम् ॥ )

दमितः, त्रि, ( दम्यते स्म इति । दम+क्तः । “वा दान्तशान्तेति ।” ७ । २ । २७ । इति पक्षे इट् । ) दान्तः । इत्यमरः । ३ । १ । ९७ ॥ (यथा, हरिवंशे । ६७ । ५६ ।
“यथेयं सरिदम्भोदा भवेच्छिवजलाशया ।
शश्वदुपभोग्या च यथा नागे वै दमिते मया ॥”)
क्लेशसहमात्रम् । इति भरतः ॥ भारवाहनादिक्लेशसहः । इति सुभूतिः ॥

दमी, [ न् ] त्रि, (दमोऽस्यास्तीति । दम+इनिः ।) दमनविशिष्टः । ( तीर्थविशेषे, क्ली । तत्प्रवर्त्तक-ऋषिभेदे, पुं । यथा, महाभारते ।३ । ८२ । ७१—७४ ।
“प्रदक्षिणमुपावृत्य गच्छेत भरतर्षभ ! ।
तीर्थं कुरुवरश्रेष्ठ ! त्रिषु लोकेषु विश्रुतम् ॥
दमीति नाम्ना विख्यातं सर्व्वपापप्रमोचनम् ।
यत्र ब्रह्मादयो देवा उपासन्ते महेश्वरम् ॥
तत्र स्नात्वार्च्चयित्वा च रुद्रं देवगणैर्वृतम् ।
जन्मप्रभृति यत् पापं तत् स्नातस्य प्रणश्यति ॥
दमी चात्र नरश्रेष्ठ ! सर्व्वदेवैरभिष्टुतः ।
तत्र स्नात्वा नरश्रेष्ठ ! हयमेधमवाप्नुयात् ॥”
दमीत्यत्र द्विमीति क्वचित् पाठः ॥ )

दमुनाः, [ स् ] पुं, ( दाम्यतीति । अन्तर्भूतण्यर्थात् दमधातोः+“दमेरुनसिः ।” उणां । ४ । २३४ । इति उनसिः । ) अग्निः । इत्यमरः ।१।१।५९॥ शुक्राचार्य्यः । इत्युणादिकोषः ॥

दमूनाः, [ स् ] पुं, (दमुनस्+अन्येषामपि दृश्यते इति पक्षे दीर्घः । यद्वा, दमेरूनसिरिति पठित्वा ऊनसिप्रत्ययः ।) अग्निः । इति शब्दरत्नावली ॥ ( त्रि, दमनीयः । यथा, ऋग्वेदे ।१।१४१।११।
“अस्मे रयिं न स्वर्थं दमूनसं भगं दक्षं न पपृचासि धर्णसिम् ॥”
दानमनाः । शान्तचित्तः । यथा, तत्रैव ।५।४।५।
“जुष्टो दमूना अतिथिर्दुरोण इमं नो यज्ञमुपयाहि विद्वान् ॥”)

दम्पती, पुं, ( जाया च पतिश्च । राजदन्तादिगणे पाठात् जायाया दम्भावो वा निपात्यते । ) भार्य्यापती । इत्यमरः । २ । ६ । ३८ ॥ (यथा, मनुः । ३ । ११६ ।
भुक्तवत्स्वथ विप्रेषु स्वेषु भृत्येषु चैव हि ।
भुञ्जीयातां ततः पश्चादवशिष्टन्तु दम्पती ॥”)

दम्भः, पुं, ( दम्भनं इति । दम्भ दम्भे+घञ् । ) कल्कः । ( यथा, पञ्चतन्त्रे । २ । २२२ ।
“सुगुप्तस्यापि दम्भस्य ब्रह्माप्यन्तं न गच्छति ॥”
अयन्तु अधर्म्मात् मृषागर्भे संजातः । यथा, भागवते । ४ । ८ । २ ।
“मृषाऽधर्म्मस्य भार्य्यासीद्दम्भं मायाञ्च शत्रुहन् ।
असूत मिथुनं तत्तु निरृतिर्जगृहेऽप्रजाः ॥”)
कल्कम् । शाटोपाहकृतिः । इति शब्दरत्नावली ॥ ( यथा, गीतायाम् । १६ । १७ ।
“आत्मसम्भाविताः स्तब्धा धनमानमदान्विताः ।
यजन्ते नाम यज्ञैस्ते दम्भेनाविधिपूर्व्वकम् ॥”
धर्म्मसुतसाहः । यथा, मनुः ।४।१६३ ।
“नास्तिक्यं वेदनिन्दाञ्च देवतानाञ्च कुत्सनम् ।
द्वेषं दम्भञ्च मानञ्च क्रोधं तैक्ष्ण्यञ्च वर्जयेत् ॥”
महादेवः । यथा, महाभारते । १३।१७।७८ ।
“दम्भो ह्यदम्भो वैदम्भो वश्यो वश्यकरः कलिः ॥”)

दम्भोलिः, पुं, ( दम्भ नोदे+भावे असुन् । दम्भसि प्रेरणे अलति पर्य्याप्नोतीति । अल+इन् । ) वज्रम् । इत्यमरः । १ । १ । ५० ॥

दम्यः, पुं, ( दम्यते इति । दम+यत् । ) वत्सतरः । स तु प्राप्तदमनकालो गौः । इत्यमरः । २ । ९ । ६२ ॥ अनड्वान् । इति राजनिर्घण्टः ॥ (यथा, महाभारते । १३ । ६६ । ४ ।
“शकटं दम्यसंयुक्तं दत्तं भवति चैव हि ॥”)
दमनीये, त्रि ॥

दय, ङि ङ रक्षणे । गतौ । वधे । दाने । अवने । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) अवनं पालनम् । ङि, दयितोऽस्ति । ङ दयते दीनं दयालुः । तेषां दयसे न कस्मात् । अत्र कर्म्मणि षष्ठी । इति दुर्गादासः ॥

दयः, पुं, ( दय+बाहुलकात् अप । ) दया । इति शब्दरत्नावली ॥

दया, स्त्री, (दय+भिदादङ् । ततष्टाप् ।) करुणा । अस्या लक्षणं यथा, पाद्मे क्रियायोगसारे ।
“यत्नादपि परक्लेशं हर्त्तुं या हृदि जायते ।
इच्छा भूमिसुरश्रेष्ठ ! सा दया परिकीर्त्तिता ॥”
अपि च मत्स्यपुराणे ।
“आत्मवत् सर्व्वभूतेषु यो हिताय शुभाय च ।
वर्त्तते सततं हृष्टः क्रिया ह्येषा दया स्मृता ॥”*॥
“परे वा बन्धुवर्गे वा मित्रे द्वेष्टरि वा सदा ।
आत्मवद्वर्त्तितव्यं हि दयैषा परिकीर्त्तिता ॥”
इत्येकादशीतत्त्वम् ॥
( इयं हि शक्तीनामन्यतमा । यथा, देवीभागवते । १ । १५ । ६० ।
“श्रद्धा मेधा स्वधा स्वाहा क्षुधा निद्रा दया गतिः ।
“संस्थिताः सर्व्वतः पार्श्वे महादेवाः पृथक् पृथक् ॥”)

दयाकूर्च्चः, पुं, (दयायां कूर्च्चः शीर्षमिव प्रधानम् ।) बुद्धः । इति हेमचन्द्रः । २ । १४८ ॥

दयालुः, त्रि, (दयते इति । दय+“स्पृहिगृहीति ।” ३ । २ । १५८ । इति आलुच् ।) दयायुक्तः । तत्पर्य्यायः । कारुणिकः २ कृपालुः ३ सूरतः ४ । इत्यमरः ।३।१।१५ ॥ (यथा, रघुः ।१०।१९ ।
“दयालुमनघस्पृष्टं पुराणमजरं विदुः ॥”)

दयितं त्रि, ( दय्यते स्मेति । दय+क्तः । ) प्रियम् । इत्यमरः । ३ । १ । ५३ ॥ ( यथा, आर्य्यासप्तशत्याम् । २८८ ।
“दृष्टमदृष्टप्रायं दयितं कृत्वा प्रकाशितन्त्वनया ।
हृदयं करेण ताड़ितमथ मिथ्याव्यञ्जितत्रपया ॥”
यथा च पञ्चतन्त्रे । २ । १८९ ।
“दयितजनविप्रयोगो वित्तवियोगश्च केन सह्याः स्युः ।
यदि सुमहौषधकल्पो वयस्यजनसङ्गमो न स्यात् ॥”)

दयितः, पुं, ( दय+क्तः । ) पतिः । इति जटाधरः ॥

दयिता, स्त्री, ( दयित+टाप् । ) भार्य्या । इति हलायुधः ॥ ( यथा, रघुः । २ । ३ ।
“निवर्त्त्य राजा दयितां दयालुस्तां सौरभेयीं सुरभिर्यशोभिः ॥”)

दर, व, ( दीर्य्यते इति । दृ+अप् । ) ईषदर्थः । इति मेदिनी । रे, ४७ ॥ ( यथा, आर्य्यासप्तशत्याम् । ३०० ।
“दरतरलेऽक्षिणि वक्षसि दरोन्नते तव मुखे च दरहसिते ।
आस्तां कुसुमं वीरः स्मरोऽधुना चित्रधनुषापि ॥”
“अक्षिणि नेत्रे ईषच्चञ्चले सति । तवेषदुन्नमिते वक्षसि मुखे च किञ्चिद्धसितवति सति ।” इति तट्टीका ॥ )

दरं, क्ली, शङ्खः । यथा । विष्णुं वन्दे दरकमलकौमोदकीचक्रपाणिमिति क्रमदीपिका ॥

दरः, पुं क्ली, ( दीर्य्यते चक्षोऽनेन । दृ+“ग्रहवृदृनिश्चिगमश्च ।” ३ । ३ । ५८ । इति अप् । ) भयम् । ( यथा, आर्य्यासप्तशत्याम् । २९५ ।
“दरनिद्राणस्यापि स्मरस्य शिल्पेन निर्गतास्तन् मे ।
मुग्धे ! तव दृष्टिरसावर्ज्जुनयन्तेषुरिव हन्ति ॥”)
गर्त्तः । इत्यमरः । ३ । ३ । १८४ ॥ ( शङ्खः । यथा, भागवते । १ । ११ । २ ।
“स उच्चकाशे धवलोदरो दरोऽप्युरुक्रमस्याधरशोणशोणिमा ।
दाध्मायमानः करकञ्जसंपुटे यथाब्जखण्डे कलहंस उत्स्वनः ॥”)
कन्दरे, पुं स्त्री । इत्यमरटीकायां भरतः ॥ ( स्त्रियां ङीप् । यथा, ऋतुसंहारे । १ । २५ ।
“ध्वनति पवनविद्धः पर्व्वतानां दरीषु स्फुटति पटुनिनादः शुष्कवंशस्थलीषु ॥”)

दरकण्टिका, स्त्री, ( दर ईषत् कण्टो यस्याः कप् । टापि अत इत्वम् । ) शतावरी । इति राजनिर्घण्टः ॥

दरणिः, पुं, (दृ विदारणे+“दृणातेरण्यनिः ।” २ । १०३ । इति उज्ज्वलदत्तोक्त्या अनिः । ) कूलभङ्गः । भाङ्गन इति भाषा । तत्पर्य्यायः । कूलहण्डः २ । इति शब्दरत्नावली ॥ कूलतण्डुलः ३ । इति भूरिप्रयोगः ॥